**अङ्गशुद्धि** स्त्री शुद्ध्यतेऽनया इति शुध-करणे क्तिन् ६त०। स्नानादौ देहसंस्कारसाधने। भावे क्तिन्। देहशोधने।

**अङ्गस्** न० अनज-असुन् कुत्वञ्च। पक्षिणि इत्युज्ज्वलदत्तः।

**अङ्गसंस्कार** पु० अङ्गं संस्क्रियतेऽनेन सम्-कृ+करणे घञ् सुट्। देहसंशोधनादिसंस्कारकारणे स्नाने गोधूमचूर्णादिनाङ्गमर्द्दने च। भावे घञ् ६त०। अङ्गस्य संस्कारे विलेपनादौ। अङ्गं संस्करोति सम्+कृ-कर्त्तरि अण् ६त०। देहसंस्कारके नरमात्रे त्रि०।

**अङ्गसंस्क्रिया** स्त्री ६त०। अङ्गसंस्कारे।

**अङ्गस्पर्श** पु० अङ्गस्य अशौचिदेहस्य इतरैः स्पर्शस्तद्योग्यता। इतरकर्त्तृकस्पर्शयोग्यतायाम्। अशौचिनाम् देहस्पर्शनिषेधे “चतुर्थेऽहनि कर्त्तव्यमस्थिसञ्चयनं द्विजैः। ततः सञ्चयनादूर्द्ध्वमङ्गस्पर्शो विधीयते” इति दक्षस्मृतौ चतुर्थदिवसे अशौचिदेहस्य स्पर्शयोग्यताभिधानात् चतुर्थदिवसे देहस्पर्शयोग्यता। एतच्च “यावद्गोत्वमसंस्पृश्य” मित्याद्युक्तव्यतिरिक्तविषयं महागुरुनिपाते पुत्रादिभिन्नविषयञ्च तच्चाङ्गास्पृश्यत्वशब्दे वक्ष्यते।

**अङ्गहार** पु० अङ्गं ह्रियते चाल्यतेऽत्र हृ-आधारे घञ् ६त०। अङ्गुल्यादिविन्यासभेदेन नृत्ये। तच्चाङ्गविक्षेपशब्दे दर्शितम्। भावे घञ् ६त०। अङ्गस्य हरणमात्रे पु०।

**अङ्गहानि** स्त्री अङ्गस्य प्रधानोपकारिणः कर्म्मणः हानिः प्रधानकर्म्मोपयोगिनः गुणादेरन्यथा सम्पादनेऽसम्पादने च। “दैवाद् भ्रमात् प्रमादाच्चेदङ्गहानिः प्रजायते। स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरिति” पुरा०।

**अङ्गहारि** पु० अङ्गानि ह्रियन्ते अत्र हृ-बा० णि। अङ्गहारार्थे स्थले रङ्गभूमौ।

**अङ्गहीन** त्रि० अङ्गेन हीनम्। साधनीभूतद्रव्यकालाद्यङ्गकरणशून्ये कर्म्मणि “अङ्गहीनं क्रियाहीनं विधिहीनञ्च यद् भवेत्। सत् सर्व्वं पूर्णतामेतु भास्करस्य प्रसादतः” इति स्मृतिः। “अङ्गहीनो दहेद्राष्ट्रं मन्त्रहीनस्तु ऋत्विजम्। यजमानमदक्षिणो नास्ति यज्ञसमो रिपुः” इति पुरा०। विकले, छिन्नदेहे च त्रि०। अङ्गेन देहेन हीनः रहितः। कामे पु०। तस्यानङ्गत्वात्तत्त्वम्। अङ्गं हीनं यथोचितप्रमाणादल्पं यस्य। हस्तपादाद्यवयवस्य यथोचितपरिमाणाभावयुक्ते त्रि०। “धान्यचौरोऽङ्गहीनत्वमातिरेक्यञ्च मिश्रक इति” मनुः। वा परनिपातेऽहीनाङ्गोऽप्यत्रार्थे। अङ्गस्य हीनतायां कारणमुक्तं सुश्रुते। “द्विहृदयाञ्च नारीं दौहृदिनीमाचक्षते। दौहृदविमानात् कुब्जं कुणिं खञ्जं जडं वामनं विकृताक्षमनक्षं वा नारी सुतं जनयति। तस्मात् सा यद्यदिच्छेत्तत्तस्यै दापयेत्। लब्धदौहृदा हि वीर्य्यवन्तं चिरायुषञ्च पुत्रं जनयति॥ भवन्ति चात्र॥ इन्द्रियार्थांस्तु यान्यान् सा भोक्तुमिच्छति गर्भिणी। गर्भाबाधभयात्तांस्तान् भिषगाहृत्य दापयेत्। सा प्राप्तदौहृदा पुत्रं जनयेत गुणान्वितम्। अलब्धदौहृदा गर्भे लभेतात्मनि वा भयम्॥ येषु येष्विन्द्रियार्थेषु दौहृदे वै विमानना। जायेत तत् सुतस्यार्त्तिस्तस्मिंस्तस्मिंस्तथेन्द्रिये” इति॥

**अङ्गाङ्गिभावः** पु० अङ्गस्य अङ्गिनश्च भावः। गौणमुख्यभावे उपकार्य्योपकारकभावे च यथा दर्शादीन् प्रति प्रयाजादीनामङ्गत्वं, प्रयाजदींश्च प्रति दर्शादीनामङ्गित्वम्। “अङ्गाङ्गिभावमज्ञात्वा कथं सामर्थ्यमन्वय” इति च मीमा०।

**अङ्गाधिप** पु० अङ्गस्य देशभेदस्य अधिपः। अङ्गदेशाधिपे प्रसिद्धतया कर्णे तस्य तद्राज्यप्राप्तिः भारते आ०। “यद्ययं फाल्गुनो युद्धे नाराज्ञा योद्धुमिच्छति। तस्मादेषोऽङ्गविषये मया राज्येऽभिषिच्यते॥ वैशम्पायन उवाच। ततस्तस्मिन् क्षणे कर्णः सलाजकुसुमैर्घटैः। काञ्चनैः काञ्चने पीठे मन्त्रविद्भिर्महारथः। अभिषिक्तोऽङ्गराज्ये स श्रिया युक्तो महाबल इति सच देशः मगधदेशस्थगिरिव्रजात् सन्निकृष्टः पूर्व्वस्यां दिशि स्थितः। सभापर्व्वणि मगधदेशवर्णने गिरिव्रजमुपवर्ण्य “अङ्गवङ्गादयश्चैव राजानश्च महाबलाः। गौतमाश्रममभ्येत्य रमन्ते स्म पुरार्जुनेति” अङ्गवङ्गनृपाणां सन्निकृष्टत्वमुक्तम्। भीमप्राच्यदिग्विजये च “विजित्य युधि कौन्तेयो मागधानभ्ययाद्बली॥ दण्डञ्च दण्डधारञ्च विजित्य पृथिवीपतीन्। तैरेव सहितः सर्व्वैर्गिरिव्रजमुपाद्रवत्। जारासन्धिं सान्त्वयित्वा करे च विनिवेश्य ह। तैरेव सहितः सर्व्वैः कर्णमभ्यद्रवद्बली॥ स कम्पयन्निव महीं बलेन चतुरङ्गिणा। युयुधे पाण्डवश्रेष्ठः कर्णेनामित्रघातिना॥ स कर्णं युधि निर्ज्जित्य वशे कृत्वा च भारत। ततो विजिग्ये बलवान् राज्ञः पर्व्वतवासिनः॥ अथ मोदागिरौ चैव राजानं बलवत्तरम्। पाण्डवो बाहुवीर्य्येण निजघान महामृधे इति”॥ एवञ्च गिरिव्रजात् पूर्व्वं मोदागिरेः पश्चात् स देशः। बृहत्संहितायान्तु तस्य भारतवर्षे आग्नेय्यां स्थितिरुक्ता। यथा “आग्नेय्यां दिशि कोशलकलिङ्गवङ्गोपवङ्गजठराङ्गा” इति। अङ्गस्य ज्योतिःशास्त्रोक्तलग्नस्य अधिपः। लग्नाधिपे पु०। “अङ्गाधिपे बलिनि सर्व्वविभूतिसम्पदिति” ज्योति०।